श्री पंचमुख हनुमत्कवचं

श्री पंचमुख हनुमत्कवचं

अस्य श्री पंचमुखहनुमन्मंत्रस्य ब्रह्मा ऋषिः गायत्रीछंदः पंचमुखविराट् हनुमान् देवता ह्रीं बीजं श्रीं शक्तिः क्रौं कीलकं क्रूं कवचं क्रैं अस्त्राय फट् इति दिग्बंधः |

श्री गरुड उवाच |
अथ ध्यानं प्रवक्ष्यामि शृणु सर्वांगसुंदरि |
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियं || 1 ||

पंचवक्त्रं महाभीमं त्रिपंचनयनैर्युतं |
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदं || 2 ||

पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभं |
दंष्ट्राकराळवदनं भृकुटीकुटिलेक्षणं || 3 ||

अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतं |
अत्युग्रतेजोवपुषं भीषणं भयनाशनं || 4 ||

पश्चिमं गारुडं वक्त्रं वक्रतुंडं महाबलं |
सर्वनागप्रशमनं विषभूतादिकृंतनं || 5 ||

उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमं |
पाताळसिंहवेतालज्वररोगादिकृंतनं || 6 ||

ऊर्ध्वं हयाननं घोरं दानवांतकरं परं |
येन वक्त्रेण विप्रेंद्र तारकाख्यं महासुरं || 7 ||

जघान शरणं तत्स्यात्सर्वशत्रुहरं परं |
ध्यात्वा पंचमुखं रुद्रं हनूमंतं दयानिधिं || 8 ||

खड्गं त्रिशूलं खट्वांगं पाशमंकुशपर्वतं |
मुष्टिं कौमोदकीं वृक्षं धारयंतं कमंडलुं || 9 ||

भिंदिपालं ज्ञानमुद्रां दशभिर्मुनिपुंगवं |
एतान्यायुधजालानि धारयंतं भजाम्यहं || 10 ||

प्रेतासनोपविष्टं तं सर्वाभरणभूषितं |
दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं |
सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखं || 11 ||

पंचास्यमच्युतमनेकविचित्रवर्ण-
-वक्त्रं शशांकशिखरं कपिराजवर्यं |
पीतांबरादिमुकुटैरुपशोभितांगं
पिंगाक्षमाद्यमनिशं मनसा स्मरामि || 12 ||

मर्कटेशं महोत्साहं सर्वशत्रुहरं परं |
शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर || 13 ||

हरिमर्कट मर्कट मंत्रमिदं
परिलिख्यति लिख्यति वामतले |
यदि नश्यति नश्यति शत्रुकुलं
यदि मुंचति मुंचति वामलता || 14 ||

ॐ हरिमर्कटाय स्वाहा |

ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारकाय स्वाहा |
ॐ नमो भगवते पंचवदनाय दक्षिणमुखाय कराळवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा |
ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरुडाननाय सकलविषहराय स्वाहा |
ॐ नमो भगवते पंचवदनाय उत्तरमुखाय आदिवराहाय सकलसंपत्करराय स्वाहा |
ॐ नमो भगवते पंचवदनाय ऊर्ध्वमुखाय हयग्रीवाय सकलजनवशंकराय स्वाहा |

ॐ अस्य श्री पंचमुखहनुमन्मंत्रस्य श्रीरामचंद्र ऋषिः अनुष्टुप्छंदः पंचमुखवीरहनुमान् देवता हनुमान् इति बीजं वायुपुत्र इति शक्तिः अंजनीसुत इति कीलकं श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः |
इति ऋष्यादिकं विन्यसेत् |

अथ करन्यासः |
ॐ अंजनीसुताय अंगुष्ठाभ्यां नमः |
ॐ रुद्रमूर्तये तर्जनीभ्यां नमः |

ॐ वायुपुत्राय मध्यमाभ्यां नमः |

ॐ अग्निगर्भाय अनामिकाभ्यां नमः |

ॐ रामदूताय कनिष्ठिकाभ्यां नमः |

ॐ पंचमुखहनुमते करतलकरपृष्ठाभ्यां नमः |

अथ अंगन्यासः |

ॐ अंजनीसुताय हृदयाय नमः |

ॐ रुद्रमूर्तये शिरसे स्वाहा |

ॐ वायुपुत्राय शिखायै वषट् |

ॐ अग्निगर्भाय कवचाय हुं |

ॐ रामदूताय नेत्रत्रयाय वौषट् |

ॐ पंचमुखहनुमते अस्त्राय फट् |

पंचमुखहनुमते स्वाहा इति दिग्बंधः |

अथ ध्यानं |

वंदे वानरनारसिंहखगराट्क्रोडाश्ववक्त्रान्वितं

दिव्यालंकरणं त्रिपंचनयनं देदीप्यमानं रुचा |

हस्ताब्जैरसिखेटपुस्तकसुधाकुंभांकुशाद्रिं हलं

खट्वांगं फणिभूरुहं दशभुजं सर्वारिवीरापहं |

अथ मंत्रः |

ॐ श्रीरामदूताय आंजनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लंकादहनकारणाय महाबलप्रचंडाय फाल्गुनसखाय कोलाहलसकलब्रह्मांडविश्वरूपाय

सप्तसमुद्रनिर्लंघनाय पिंगळनयनाय अमितविक्रमाय सूर्यबिंबफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालंकृताय

संजीविनीसंजीवितांगद-लक्ष्मणमहाकपिसैन्यप्राणदाय

दशकंठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय सीतासहितरामवरप्रदाय षट्प्रयोगागमपंचमुखवीरहनुमन्मंत्रजपे विनियोगः |

ॐ हरिमर्कटमर्कटाय बंबंबंबं वौषट् स्वाहा |

ॐ हरिमर्कटमर्कटाय फंफंफंफंफं फट् स्वाहा |

ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणाय स्वाहा |

ॐ हरिमर्कटमर्कटाय लुंलुंलुंलुंलुं आकर्षितसकलसंपत्कराय स्वाहा |

ॐ हरिमर्कटमर्कटाय धंधंधंधंधं शत्रुस्तंभनाय स्वाहा |

ॐ टंटंटंटंटं कूर्ममूर्तये पंचमुखवीरहनुमते परयंत्र परतंत्रोच्चाटनाय स्वाहा |
ॐ कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहं ळंक्षं स्वाहा |
इति दिग्बंधः |

ॐ पूर्वकपिमुखाय पंचमुखहनुमते टंटंटंटंटं सकलशत्रुसंहरणाय स्वाहा |
ॐ दक्षिणमुखाय पंचमुखहनुमते कराळवदनाय नरसिंहाय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा |
ॐ पश्चिममुखाय गरुडाननाय पंचमुखहनुमते मंमंमंमंमं सकलविषहराय स्वाहा |
ॐ उत्तरमुखाय आदिवराहाय लंलंलंलंलं नृसिंहाय नीलकंठमूर्तये पंचमुखहनुमते स्वाहा |
ॐ ऊर्ध्वमुखाय हयग्रीवाय रुंरुंरुंरुंरुं रुद्रमूर्तये सकलप्रयोजननिर्वाहकाय स्वाहा |

ॐ अंजनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचंद्रकृपापादुकाय महावीर्यप्रमथनाय
ब्रह्मांडनाथाय कामदाय पंचमुखवीरहनुमते स्वाहा |

भूतप्रेतपिशाचब्रह्मराक्षस शाकिनीडाकिन्यंतरिक्षग्रह परयंत्र परतंत्रोच्चटनाय स्वाहा |
सकलप्रयोजननिर्वाहकाय पंचमुखवीरहनुमते श्रीरामचंद्रवरप्रसादाय जंजंजंजंजं स्वाहा |

इदं कवचं पठित्वा तु महाकवचं पठेन्नरः |
एकवारं जपेत् स्तोत्रं सर्वशत्रुनिवारणं || 15 ||

द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनं |
त्रिवारं च पठेन्नित्यं सर्वसंपत्करं शुभं || 16 ||

चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणं |
पंचवारं पठेन्नित्यं सर्वलोकवशंकरं || 17 ||

षड्वारं च पठेन्नित्यं सर्वदेववशंकरं |
सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकं || 18 ||

अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदं |
नववारं पठेन्नित्यं राजभोगमवाप्नुयात् || 19 ||

दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनं |
रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद्ध्रुवं || 20 ||

निर्बलो रोगयुक्तश्च महाव्याध्यादिपीडितः |
कवचस्मरणेनैव महाबलमवाप्नुयात् || 21 ||

इति सुदर्शनसंहितायां श्रीरामचंद्रसीताप्रोक्तं श्री पंचमुखहनुमत्कवचं |